# Shri Veda VyasAShTakam

# શ્રીવેદવ્યાસાષ્ટકમ્

## Document Information

Text title : Shri Veda Vyasa Ashtakam

File name : vyasa-8.itx

Category : aShTaka, deities_misc, brahmAnanda

Location : doc_deities_misc

Author : svAmibrahmAnandavirachitaM

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : Homage to Veda Vyasa

Latest update : August 25, 2007

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 4, 2022

*sanskritdocuments.org*

# Shri Veda VyasAShTakam

# શ્રીવેદવ્યાસાષ્ટકમ્

(દ્રુતવિલમ્બિતં છન્દઃ)

કલિમલાસ્તવિવેકદિવાકરં સમવલોક્ય તમોવલિતં જનમ્ ।
કરુણયા ભુવિ દર્શિતવિગ્રહં મુનિવરં તમહં સતતં ભજે ॥ ૧॥ (મુનિવરં તમહં સતતં ભજે

ભરતવંશસમુદ્ધરણેચ્છયા સ્વજનનીવચસા પરિનોદિતઃ ।
અજનયત્તનયત્રિતયં પ્રભુઃ શુકનુતં તમહં સતતં ભજે ॥ ૨॥

મતિબલાદિ નિરીક્ષ્ય કલૌ નૃણાં લઘુતરં કૃપયા નિગમામ્બુધેઃ ।
સમકરોદિહ ભાગમનેકધા શ્રુતિપતિં તમહં સતતં ભજે ॥ ૩॥

સકલધર્મનિરૂપણસાગરં વિવિધચિત્રકથાસમલઙ્કૃતમ્ ।
વ્યરચયચ્ચ પુરાણકદમ્બકં કવિવરં તમહં સતતં ભજે ॥ ૪॥

શ્રુતિવિરોધસમન્વયદર્પણં નિખિલવાદિમતાન્ધ્યવિદારણમ્ ।
ગ્રથિતવાનપિ સૂત્રસમૂહકં મુનિસુતં તમહં સતતં ભજે ॥ ૫॥

યદનુભાવવશેન દિવં ગતઃ સમધિગમ્ય મહાસ્ત્રસમુચ્ચયમ્ ।
કુરુચમૂમજયદ્વિજયો(૧) દ્રુતં દ્યુતિધરં તમહં સતતં ભજે ॥ ૬॥

સમરવૃત્તવિબોધસમીહયા કુરુવરેણ(૨) મુદા કૃતયાચનઃ ।
સપદિ સૂતમદાદમલેક્ષણં(૩) કલિહરં તમહં સતતં ભજે ॥ ૭॥

વનનિવાસપરૌ કુરુદમ્પતિ સુતશુચા તપસા ચ વિકર્ષિતૌ ।
મૃતતનૂજગણં સમદર્શયત્ શરણદં તમહં સતતં ભજે ॥ ૮॥

વ્યાસાષ્ટકમિદં પુણ્યં બ્રહ્માનન્દેન કીર્તિતમ્ ।
યઃ પઠેન્મનુજો નિત્યં સ ભવેચ્છાસ્ત્રપારગઃ ॥

ઇતિ શ્રીમત્પરમહંસસ્વામિબ્રહ્માનન્દવિરચિતં
શ્રીવેદવ્યાસાષ્ટકં સમ્પૂર્ણમ્ ।

૧ કુરુવરેણ refers to ધૃતરાષ્ટ્રેણ

૨ દ્વિજયો refers to વિજયોર્જુનઃ
૩ સૂતં refers to સઞ્જયં

The refrain તમહં સતતં ભજે
is also replaced by ગુરુવ્યાસમહં ભજે
in some prints.

Encoded and proofread by Sunder Hattangadi

*Shri Veda VyasAShTakam*
pdf was typeset on November 4, 2022

Please send corrections to *sanskrit@cheerful.com*